ISSN : 2583-2271
Vol. - I, No. 1: 2021

# प्राकृतिकचिकित्सापद्धतिः

**डा.जगमोहन आचार्य:**


## प्रबन्धसारः

*प्रकृतिं विहाय जीवन न जीवनम्। ऋषयः प्रकृत्या: उपासका: । एते वैदिकदेवानां परिकल्पनं प्रकृत्याधारेणैव कृतवन्तः। वेदे रोगस्य निराकरणाय विविधानि कौशलानि दृश्यन्ते। जल-वायु-अग्नि-मृत्तिका-सूर्य-चन्द्र-स्पर्श-मन्त्रादिप्रयोगेण वैदिककाले रोगोपशमनं जातम् इति वैदिकमन्त्रत ज्ञायते। वैदिकमन्त्राणाम् अध्ययनत: विविधरोगाणां निवारण कथं भवति? केनोपायेन वा भवति? तेषां सुन्दरम् आलोचनं मिलति। तेषु प्रमुखाः प्रबन्धेऽस्मिन् वर्णिताः। वंशगतरोगः, नेत्ररोगः, पादपीडा, शीर्षकपालव्यथा, हृद्रोगः, अङ्गपीडा, कामलरोगः, हरिमारोगः, गण्डमालरोगः, व्रणः, क्षेत्रियरोगः, यक्ष्मा चेत्यादयः सामान्यत: अत्रालोचिताः। स्पर्शचिकित्सायास्तथा मन्त्रचिकित्साया: प्रयोगम् ऋषय कृतवन्तः। याः चिकित्सा: वैदिककाले ऋषयः कृतवन्तः तासां सर्वासां चिकित्सापद्धतीनां प्रयोगम् अधुनाऽपि कुर्वन्ति वैद्याः। सम्प्रति विश्वं करोनायाः कुप्रभावेन प्रभावितम्। सर्वे प्राकृतिकचिकित्सायाः प्रयोगं कुर्वन्ति अद्य। अत: प्राकृतिकपद्धत्या रोगनिराकरणं तथा आयुर्वर्धकस्य रहस्यं प्रबन्धेऽस्मिन् आलोचितम्।*


## उपक्रमः

ज्ञानेन विज्ञानस्य तथा विज्ञानेन ज्ञानस्य परिप्रकाशः भवति। वेदो भवति ज्ञानस्य विज्ञानस्य च समन्वयरूपः। शरीरं नाम रोगमन्दिरम्। आरोग्यवर्धनाय चिकित्सका भिन्नं भिन्नं प्रयोगं कुर्वन्ति। वेदे रोगस्य निराकरणाय प्रकारकं कौशलं दृश्यते। यद्यपि अथर्ववेदे आयुर्वेदस्योपरि चर्चा अधिका तथापि ऋग्वेदे अन्यत्रापि च रोगकारणस्य रोगनिराकरणस्य चोपरि आलोचयन्ति ऋषयः। प्रकृतिप्रेमिण: ऋषयः प्रकृत्याधारेण जीवनं चालयन्ति। प्रकृतिमादाय सूक्ष्मरहस्यम् उपस्थापयन्ति ऋषयः। जल-वायु-अग्नि-मृत्तिका-सूर्य-चन्द्रस्पर्श-मन्त्रादिप्रयोगेण वैदिककाले रोगोपशमनं जातम् इति मन्त्रतः ज्ञायते। यद्यपि अन्यासां पद्धतीनाम् उल्लेख: दृश्यते तथापि प्राकृतिकपद्धति: मूलमेव। चरकेण आयुर्वेदस्य लक्ष्यं किमिति स्पष्टं करोति यत्, स्वस्थस्य स्वास्थ्यरक्षणं तथा रोगिणः निरोगीकरणम् आयुर्वेदस्य मूलभूतं कार्यम्। अत: प्राकृतिकपद्धत्या रोगनिराकरणं तथा आयुर्वर्धकस्य रहस्यं प्रबन्धेऽस्मिन् आलोचितम्।

## जलचिकित्साः

जलं अमृतमिति[1]। वेदे अपि आम्नातम्, अप्स्वन्तरमृतमप्सु भेषजम्[2]। यथा माता दुग्धेन शक्तिं संचारयति तथा जलमपि शुद्धं करोति। यजुर्वेदेनोक्तम्, आपो अस्मान्मातरः[3]। जलेन मनुष्याणां तथा मनुष्येतरप्राणिनाम् जीवनं चलति। जलेन आरोग्यकामना क्रियते। तद्यथा,

"अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा।
आग्निं च विश्वशंभुवमापश्च विश्वभेषजी॥"[4]

## वंशगतरोगम्

मन्त्रयुक्तेन जलेन रोग: दूरं याति। क्षत्रियरोगस्य कृते आप: अत्यन्तं लाभदायिकाः। क्षत्रियरोगो नाम वंशगतरोगमः। उक्तं च,

"आप इद् वा उ भेषजीरपो अमीवचातनीः।
आपो विश्वस्य भेषजीस्तास्त्वा मुञ्चन्तु क्षत्रियात्॥"[5]

जलं जीवनम् इति लोकोक्ति: सुपरिचिता। जलं सर्वौषधस्य मूलम् इति ऋषय: उद्घोषितवन्तः। तद्यथा,

आप: विश्वभेषजी:।[6] औषधयः जलेन समाहिता: सन्ति। जलं वहति, एतत्तु तस्य धर्मः। परन्तु जलं शरीरत: रोगमादाय वहतु इति प्रार्थयते ऋषिः। यथा,

"इदमाप प्रवहत यात्किं च दुरीतं मयि।
यद्वाहमभिदुद्राह यद्वा शेष उतानृतम्।"[7]

## नेत्ररोगः पादपीडा च

ऋषि शान्ता आपः शान्तिप्रदायिकाः इति स्वीकरोति। आप: पापनाशिकाः तथा भेषजस्य प्रदायिकाः। हिमालयात् आरभ्य समुद्रं गतवत्या नद्या: जलं दिव्यगन्धयुक्तं भवति। वैद्यराजः नेत्ररोगस्य तथा पादपीडाया: उपशमनार्थं जलस्य प्रयोगं कुर्वन्ति। उक्तं यथा,

"हिमवतः प्रस्रवन्ति सिन्धौ समह संगमः।

---

[1] अमृतमुदकं नाम, निघण्टु,१.१२
[2] अथर्ववेदः,१.४.४
[3] यजुर्वेदः,४.२. ४
[4] ऋग्वेदः, १.२३.१०
[5] अथर्व, ३.७.५
[6] ऋग्वेदः,१.२३.२०
[7] ऋग्वेदः,१.२३.२२

आपो ह मह्य तद् देवीर्ददन् हृद्यित भेषजम्॥"[8]
"यन्मे अक्ष्योरादिद्योत पाष्ण्यो प्रपदोश्च यत्।
आपस्तत् सर्वं मिष्करन् भिषजां सुभिषक्तमाः॥"[9]

सर्वेषां हितकारित्वात् जलं मङ्गलमयं तथा पापरक्षाकारि भवति।[10] आरोग्यवर्धिका: आपः इति। सूर्यस्य दर्शनं दीर्घकालं यावत् भवतु इति कामनया ऋषि: अपां स्तुतिं करोति। अर्थात् जलं भवति आरोग्यवर्धकं तथा दीर्घायुःप्रदायकम्। आप: स्तूयन्ते नीरोगाय तथा दीर्घजीवनाय। यथा,

"आप: पृणीत भेषजं वरूथं तन्वेमम।
ज्योक् च सूर्यं दृशे॥"[11]

वैद्यानां मध्ये श्रेष्ठवैद्य: जलमेव। ऋषि: सगर्वं वदति जलमेव अधिकं हितकारि। यथा,

"भिषग्भ्यो भिषक्तरा आ
अच्छा वदामसि।"[12]

जलं भवति ऊर्जाप्रदायकं तथा रोगस्य शमनकारि। उक्तं यथा,

"घृतैव अप् ऊर्जा प्रदायकः।"[13]

दैवीगुणयुक्ता आपः अस्माकं सर्वसिद्धिप्रदायिका कल्याणकारिण्यः तथा प्रसन्नताप्रदायिकाः। सर्वाकाङ्क्षां पूरयित्वा आप: आरोग्यप्रदायं कुर्वन्ति।

"शं नो देवीरभिष्टय आपो भवन्तु पीतये।
शं योरभिस्रवन्तु नः।"[14]

जलं सर्वरोगस्य मूलं नाशयति। हितकरभेषजरूपेण स्तुता: आपः। तद्यथा,

"आप इद्वा उ भेषजीरापो अमीवचातनीः।
आपः सर्वस्य भेषजास्तास्ते कृण्वन्तु भेषजम्॥"[15]

## सौरचिकित्सा

शीर्षकपालव्यथा, हृद्रोगः, अङ्गपीडा चेति रोगाः सूर्यस्य रश्मिभि: दूरं यान्ति। यथा,

"शं ते शीर्ण: कपालादि हृदयस्य च यो विदुः।
उद्यन्नादित्य रश्मिभिः शीर्ष्णो रोगमनीनशोङ्गभेदमशीशमः॥"[16]

सूर्यदेवः शक्तेः तथा आनन्दस्य प्रतीकः। सप्तवर्णीरथेन सूर्यदेवः सुशोभित:। उक्तं यथा,

"सप्त त्वा हतिरो रथे वहन्ति देव सूर्य।
शोचिष्केशं विचक्षण॥"[17]

सूर्यकिरणानि बहुविधरोगस्य निवारकाणि। ऋषिः प्रस्कण्वकाण्वः सूर्यदेवस्य उदयरश्मिं हृद्रोगस्य नाशनार्थं प्रार्थयति।तथा कामलरोगस्य विनाशाय अनुरुद्धे। तद्यथा,

"उद्यन्नद्य मित्रमह आरोहन्नुत्तरां देवम्।
हृद्रोगं मम सूर्य हरिमाणं च नाशय॥"[18]

सूर्यस्य तेज: शरीरं पूर्णरूपेण रोगत: दूरं करोति।

"उदगादयमादित्यो विश्वेन सहसा सह।
द्विषन्तं मह्यं रन्धयन्मो अहं द्विषते रधम्॥"[19]

सूर्य: जगत: आत्मरूपेण परिचितः।[20]

**रोगनाशनक्षमता**

सूर्यः यदा उदितो भवति तथा अस्तं गच्छति स समयो भवति रोगनिराकरणस्य उत्कृष्टसमयः। सूर्यस्य रश्मिभिः क्रिमिनाशो भवति। अथर्ववेदे उक्तं यथा,

"उद्यन्नादित्यः क्रिमीन् हन्तु निम्रोचन् हन्तु रश्मिभिः।
ये अन्त: क्रिमयो गवि।"[21]

**कीटाणुः**

सूर्यकिरणेन अमीवा (कीटाणुः) तत्कालं नष्टं भवति।[22]

**हृद्रोगः/ हरिमारोगः**

अथर्ववेदे ऋषिः ब्रह्मा दृढतया स्पष्टीकरोति सूर्यरश्मिः हृद्रोगस्य तथा हरिमारोगस्य महौषधिः। अत: उदयकालीनसूर्यस्य रश्मि: सदैव ग्रहणीयः।

"अनु सूर्यमुदयतां हृद्योतो हतिमा च ते।
घो रोहितस्य वर्णेन तेन त्वा परि दध्मसि॥"[23]

**गण्डमालरोगः**

सूर्यः तथा चन्द्रः गण्डमालरोगस्य निवारकः। सूर्यः गण्डमालरोगस्य औषधं निर्माति तथा चन्द्रः एतस्य प्रयोगं करोति। सूर्यस्य रश्मिः; तथा चन्द्रस्य किरणेन गण्डमालरोगस्य नाशो जायते। उक्तं यथा,

"अपचित: प्र पतत सुपर्णो वसतेरिव।
सूर्यः कृणोतु भेषजं चन्द्रमा वोऽपिच्छतु॥"[24]

गण्डमालस्य स्वरूपविषये उक्तम् यथा,

"एन्येका श्येन्येका कृष्णैका रोहिणी द्वे।
सर्वासामग्रभं नामावीरघ्नीरपेतन॥"[25]

यज्ञेन कृतं घृताहुतेन गण्डमाल नष्टं जायते। तद्यथा,

"वीहि स्वमाहुतिं जुषाणो मनसा स्वाहा मनसा यदिदं जुहोमि॥"[26]

अथर्ववेदे बहुविधरोगस्य उपशमनस्य कारणं सूर्यस्य रश्मिः। शिरोवेदना, कर्णशूलः, मुखस्रावः, नेत्रान्धता, सर्वाङ्गपीडा, कफः, श्वासः, न्युमोनिया, हृद्रोगः, रक्तचापः, कामलरोगः, उदरपीडा, मूत्ररोगः, गुप्तरोग: प्रभृतीनां शमनं सूर्यस्य किरणेन सम्भवति।

---

[8] अथर्ववेदः,६.२४.१
[9] अथर्ववेदः, ६.२४.२
[10] शं नो भवन्त्वप ओषधी: शिवाः, अथर्ववेदः,६.२३.३
[11] ऋग्वेदः,१.२३.२१/ अथर्ववेदः,१.६.३
[12] अथर्ववेदः,१९.२.३
[13] अथर्ववेदः,३.१३.५
[14] यजुर्वेदः,३६.१२/ अथर्ववेदः,१.६.१
[15] ऋग्वेदः,१०.१३७.६
[16] १अथर्व, ९.८.२२
[17] ऋग्वेदः,१.५०.८ , सामवेदः, ६.५.१४
[18] ऋग्वेदः,१.५०.११
[19] ऋग्वेदः,१.५०.१३
[20] ऋग्वेदः,१.११५.१
[21] अथर्ववेदः,२.३ २.१
[22] अपामीवां सविता साविषत्, ऋग्वेदः,१०.१००.८
[23] अथर्ववेदः,१.२२.१
[24] अथर्ववेदः,६.८३.१
[25] अथर्ववेदः, ६.८३.२
[26] अथर्ववेदः,६.८३.४

**मृत्तिकाचिकित्सा**

❖ **विषनाशनम्**

अथर्ववेदे सौराष्ट्री नामिकाया मृत्तिकायाः वर्णनम् आयाति, या विषचिकित्सायाः महौषधिः। सौराष्ट्रीमृत्तिकायाः लेपनेन, सेवनेन, पानेन, स्नानेन च विषक्रियाया समाप्तिर्भवति।[27] ऋग्वेदे आम्नातम् उपजिह्विका मृत्तिकायाः लेपनेन, सेवनेन, पानेन, स्नानेन च विषनाशो भवति।[28]

❖ **केशचिकित्सा**

अद्यत्वे केशस्य घनत्वसम्पादनार्थं तथा वर्धनार्थं मृत्तिकायाः प्रयोगो भवति। वेदे अस्य प्रमाणं मिलति। यथा,

"देवी देव्यामधि जाता पृथिव्यामप्योषधे।
तां त्वा नितत्नि केशेभ्यो दृंहणाय खनामसि ॥"[29]

❖ **काशः**

शुष्ककाशस्य निराकरणं रेहिलमृत्तिकया भवति।[30]

❖ **व्रणः**

व्रणः कृष्णमृत्तिकाद्वारा झटिति दूरं याति।[31]

**क्षेत्रियरोगः**

क्षेत्रं लङ्गुलेन कर्षणं भवति। लङ्गुलकर्षणेभ्य उद्गतः मृत्खण्डोद्गमः गन्धः दुरारोग्यक्षेत्रियरोगस्य उपशमं करोति। उक्तमस्ति,

"नमस्ते लाङ्गकेभ्यो नम ईषायुगेभ्यः।
वीरुतक्षेत्रियनाशन्यप क्षेत्रियमुच्छतु ॥"[32]

**अग्निचिकित्सा**

अग्निः ऋग्वेदे तथा अन्यत्रापि बहुत्र स्तुतः। ऊर्ध्वगमनशीलः अग्निः सदा यजमानस्य हिताय गतिशीलः। शैत्यस्य निवारणाय अधुनापि अग्निः स्तूयते।यजुर्वेदे उक्तं , अग्निर्हिमस्य भेषजम्।[33]

**यक्ष्मा**

अग्नेः ज्वाला रोगं दूरं नयति। यथा अश्वः शीघ्रं धावति तथा अग्निः तस्य धूमेन यक्ष्मारोगं शीघ्रं दूरं नयति। यज्ञाग्निद्वारा रक्तपरिष्करणं भवति। उक्तं यथा,

"न तं यक्ष्मा अरुन्धते नैनं शपथो अश्नुते।
यं भेषजस्य गुल्गलोः सुरभिर्गन्धो अश्नुते ॥"[34]

**स्पर्शचिकित्सा:**

मन्त्रोच्चारणेन यथा जिह्वावाण्योः मेलनं भवति तथैव दशाङ्गुलिविशिष्टहस्तेन सह रोगस्य मिलनेन रोगमुक्तिः भवति। अर्थात् हस्तस्य स्पर्शेण रोगमुक्तिः भवति। उक्तं यथा,

"हस्ताभ्यां दशशाखाभ्यां जिह्वा वाचः पुरोगवी।
अनामयित्नुभ्यां त्वा ताभ्यां त्वोप स्पृशामसि ॥"[35]

**मन्त्रचिकित्सा**

अथर्ववेदे आम्नातमस्ति यत् अत्रिः, कण्वः, जमदग्निः, अगस्तिः प्रभृतय ऋषयः मन्त्रोच्चारणेन अशुभान् तथा रोगवर्धकान् क्रिमीन् नाशयन्ति। तद्यथा,

"अत्रिवत् वः क्रिमयो हन्मि कण्वज्जमदग्निवत्।
अगस्त्यस्य ब्रह्मणा सं पिनष्म्यहं क्रिमीन् ॥"[36]

मन्त्रोच्चारणेन समूलं विनाशं यान्ति क्रिमयः। परिवेशतः अपि मन्त्रशक्तिद्वारा क्रिमयः नष्टं यान्ति। तद्यथा,

"हतासि अस्य वेशस्य हतासः परिविशतः।
अथ ये क्षुल्लका इव सर्वे ते क्रिमयो हताः ॥"[37]

**उपसंहारः**

आद्यनादितत्त्वस्य सारः वेदः। वेदोक्तः प्रयोगः अद्यापि प्रचलति। सूर्यस्य रश्मिं स्वीकर्तुं उपदिशन्ति अद्यापि वैद्याः। जलचिकित्सा आधुनिकसमयस्य श्रेष्ठा चिकित्सा। अद्यापि सन्ति बहबः ये दैवीशक्तिद्वारा रोगनिवारणं कुर्वन्ति। संगीतश्रवणेन मनसः दुःखं दूरीभवति। तन्नाम वेदे दर्शितं चिकित्साविज्ञानम् अद्य न त्यजन्ति चिकित्सकाः। अद्यत्वे वैदिकचिकित्सा-विज्ञानस्य महत्त्वं सर्वैः अङ्गीकरणीयमेव।

**सहायकग्रन्थाः**

- ऋग्वेदसंहिता, श्रीरामशर्माआचार्यः, शान्तिकुञ्ज, हरिद्वारम्
- अथर्ववेदसंहिता, श्रीरामशर्माआचार्यः, शान्तिकुञ्ज, हरिद्वारम्
- ऋग्वेदसंहिता, सायणभाष्यसहितम्
- अथर्ववेदसंहिता, सायणभाष्यसहितम्
- सामवेदसंहिता, श्रीरामशर्माआचार्यः, शान्तिकुञ्ज, हरिद्वारम

[27] अथर्ववेदः,४.७

[28] ऋग्वेदः,८.१०२.२१

[29] अथर्ववेदः, ६.१३६.१

[30] अथर्ववेदः, ६.१०५

[31] अथर्ववेदः, २.३.४-६

[32] अथर्ववेदः. २.८.४

[33] यजुर्वेदः,२३.१०

[34] अथर्ववेदः, १९.३८.१-२

[35] ऋग्वेदः,१०.१३७.७

[36] अथर्ववेदः, १.३२.३

[37] अथर्ववेदः, १.३२.५